॥ श्रीः ॥

सिद्धान्तत्रय-ब्रह्मसूत्राधिकरणार्थसंग्रहः

नवसालपुराधीश-विद्वत्सभाध्यक्ष दानाधिकारिभिः
काळि, वल्लीपुरं, रङ्गाचार्यैः
विरचितः



प्रकाशकः—
बी. श्रीनिवासन्,
मम्बारपुरम्, पुदुकोट्टै।

कुम्भघोणस्थ
श्री जनार्दनमुद्रायन्त्रालये मुद्रिता
चिजयतेतराम्।

मूल्यं] १९४३. [१-८-०

PRINTED AT THE
SRI JANARDANA PRINTING WORKS, LTD.,
TOWN HIGH SCHOOL ROAD,
KUMBAKONAM.

FOREWORD.

मतत्रयस्थगुरुभिः श्रुत्यन्तविपिनस्थितम् ।
अद्यापि मृग्यमाणं तं ब्रह्मरूपं हरिं भजे ॥

The work on hand furnishes the long-felt need to the students of philosophy. There does not appear to be any medium up-to-now to get by heart the gist of all the Adhikaranas in the Brahmasutra-Bhashyas of Sri Sankara Bhagavad Ramanuja and Sri Madhvacarya and as such this work, enriched by facile language, and tacit ideas is an asset to those in the field of philosophy, as it helps keeping at fingers' ends the gist of all the Adhikaranas in their order.

This is only preliminary to the major volume that is now in the press—Matha-thraya-sara-sangraha (मतत्रयसार-संग्रहः), a compilation in Slokas of all the three Bhashyas Advaita, Vishishtadvaita and Dvaita, in the order of Adhikaranas, with the author's detailed explanatory notes and thought-provoking *Purvapaksha* and *Sidhanta*, setting even the shrewdest philosopher a-thinking. It is really fitting that the author with his mastery over the subject, besides his proficiency in other Shastras, has taken up this work and it need hardly be said that the students and savants of diverse schools of thought owe a deep debt of gratitude to him.

A list of all the Adhikaranas in each Sidhanta is appended and the numbers over the Slokas indicate the corresponding Adhikaranas in the list.

The fact that I am privileged to write to dictation and edit this book as well as the Matha-tharaya-sara-sanghar-

gives me supreme satisfaction and I now consider myself highly fortunate, reminded often of the Upanishadic verse "तस्य पुत्रा दायमुपयन्ति सुहृदस्साधुकृत्यां" ।

"ब्रह्मविद्याप्रदानस्य देवैरपि न शक्यते ।
प्रतिप्रदानमपि वा दद्याच्छक्तित आदरात् ॥"

So goes the verse and I am glad that I am near the point of rendering some humble service to my Acarya at least by bringing out his valuable works, if not otherwise.

My expression of thanks to Mr. S. Kalyanasundram, Manager, Sri Janardana Printing Works, Limited, Kumbakonam, is not a formal note as the interest that he evinces in publishing this work and the Matha-thraya-Sangrahas is really something more than what a printer can ordinarily be expected to do.

Ambalpuram,
Pudukkottai,
12th December, '42.

V. SRINIVASAN.

श्रीः

முகவுரை

श्रीमन्नपर्यासुधासमुद्र श्रीशार्ङ्गपाणे :
श्रीभक्तिसारादिमुनीन्द्रचित्तपीयूष हेमाब्जरमापतऽव ॥

ப்ரும்மஸூத்ரங்களுக்கு மூன்று மதாசார்யர்களாலும் எழுதப்பட்ட பாஷ்யத்தின் அதிகரணங்களின் தாத்பர்யத்தை யதாக்ரமம் ஞாபகம் வைத்துக்கொள்ளவேண்டியதற்கு வாஸதியாக சேர்ந்தாற்போல் ச்லோகரூபமாகவோ, வாக்யரூபமாகவோ, யாதொரு க்ரந்தமும் இதுவரை யாராலும் செய்யப்பட்டதாகத் தெரியவில்லை. அப்படிக்கிருக்க மூன்று மதங்களிலுமுள்ள பாஷ்யங்களுக்கும் ஸுலபமாக அதிகரணங்களின் தாத்பர்யத்தை யதாக்ரமம் சிந்தனை செய்யவும், வாக்யார்த்த காலங்களில் உபயோகிக்கவும் இந்த அதிகாரஸுர்த்தஸங்க்ரஹம் மிகவும் இன்றியமையாதது. இந்தக் க்ரந்தகர்த்தாவால் செய்யப்பட்டு தற்சமயம் அச்சிலிருக்கும் 'மதத்ரய ஸாரஸங்க்ரஹம்' என்னும் மற்றொரு விசேஷ க்ரந்தத்துக்கு பூர்வாங்கமாகவே இது எழுதப்பட்டது. மூன்று ஸித்தாந்தங்களும் சேர்ந்து விசேஷ பூர்வபக்ஷ ஸித்தாந்தங்களுடன் ஒரே க்ரந்தமாக இதுவரை யாராலும் எழுதப்படாததால் இந்த "மதத்ரய ஸாரஸங்க்ரஹமும்" வேதாந்திகளுக்கும் ஆராய்ச்சியாளர்களுக்கும் மிகவும் உபயோகமானது.

"दिङ्मोहक्षोभदीनान् दिनकरकिरणश्रेणिकेवोज्जिहाना
हृद्या पद्यावलीयं हृदयमधिगता सावधानान् धिनोतु ॥

என்று ஸ்ரீ வேதாந்த தேசிகர் அருளிய ப்ரகாரம் அத்யாத்ம சாஸ்த்ரத்திலிறங்கினவர்களுக்கு இந்த க்ரந்தம் பரம உபயோகமாயிருக்கும்.

இதைப் பதிப்பிப்பதில் ஏதாவது தவறு இருந்தாலும் க்ரந்தத்தின் கௌரவத்தை யுத்தேசித்து க்ஷமிக்கவேணும்.

அம்பாள்புரம்,
புதுக்கோட்டை.
12th December, 1942.

V. ஸ்ரீனிவாஸன்.

॥ विषयसूचिका ॥

Forward

முகவுரை

शुद्धपत्रिका

अधिकरणार्थसंग्रहः (अद्वैतम्) 1

,, विशिष्टाद्वैतम् 11

,, द्वैतम् 14

अधिकरणनामधेयसूचिका (अद्वैतम्) 30

,, विशिष्टाद्वैतम् 34

,, द्वैतम् 37

॥ श्रीः ॥

सिद्धान्तत्रय
ब्रह्मसूत्राधिकरणार्थसंग्रहः

श्रीशङ्कर-सूत्रभाष्याधिकरणार्थसंग्रहः ॥

(अद्वैतं)

प्रथमाध्यायः ॥

आदि श्रीशङ्कराचार्यं नत्वा निध्याय तद्गिरः ।
विरच्यते तद्भाष्याधिकरणार्थस्य संग्रहः ॥
सूत्रभाष्याधिकरणनिर्णीतार्थस्य संग्रहः ।
बुधानां सुखबोधाय रङ्गाचार्येणलिख्यते ॥१ ॥

ब्रह्मास्ति[1] वेद्यं जगतोनिदानं[2] वेदस्य[3] योनिः[4] पुरुषार्थभूतः ।
अचेतनत्वाच्च[5] न तत्[6] प्रधानं तत्स्वप्रधानं निखिलस्य[7] पुच्छम् ॥ २ ॥
आदित्यनेत्रान्तरगः[8] परात्मा ध्येयस्स आकाशपदाभिधेयः ।
छान्दोग्यगप्राणपदाभिधेयः[9] ज्योतिर्द्युसम्बन्धितया[10] परात्मा ॥ ३ ॥
कौषीतकीप्राणपदाभिधेयः[11] ब्रह्मैव पूर्वापरवेदवाक्यात् ।
मनोमयत्वादि विशिष्ट[12] आत्मा ध्येयं परं ब्रह्म तथा प्रसिद्धेः ॥ ४ ॥
चराचरात्ता[13] च परस्स एव मृत्युश्च यस्याप्युपसेचनं तत् ।
गुहां प्रविष्टौ[14] च परात्मजीवौ प्रयोजकत्वेन च पानसिद्धेः ॥ ५ ॥
एषोक्षिदृष्टः[15] पुरुषः परात्माऽमृताभयत्वादि गुणोक्ति सत्त्वात् ।
योसौ पृथिव्यादिषु तिष्ठतेऽन्तर्यामी[16] परात्मा नियमादितोक्तेः ॥६ ॥

तदक्षरं ब्रह्म परं तु भूतयोनिश्रुतेर्दृश्यनिषेधतश्च ।[17]

वैश्वानरात्मा परमेश एव द्युमूर्धतादेः परमात्मधर्मात् ॥ ७ ॥[18]

द्युभ्वन्तरिक्षाऽयतनं परात्मा तमेकमात्मानमिति स्वशब्दात् ।[19]

भूमा परं ब्रह्म तु संप्रसादात् ऊर्ध्वोपदेशादिति वादितोक्तेः ॥ ८ ॥[20]

आरण्यकोक्ताक्षरशब्दवाच्यः खान्तस्य धृत्या पर एव चात्मा ।[21]

ध्येयः परः पूरुष इत्यदश्च ब्रह्मेक्षतेः कर्मतयोक्तिसत्त्वात् ॥ ९ ॥[22]

आकाशशब्दो दहराभिधेयः जिज्ञास्यतादेः परमेश एव ।[23]

'तमेव भान्तं' त्विति भापदार्थः प्राज्ञो हि तस्यानुकृतिश्रुतेश्च ॥ १० ॥[24]

अङ्गुष्ठमात्रः पुरुषः परात्मा त्वीशानशब्दात् प्रमितृत्वसिद्धेः ।[25]

परासु विद्यासु च देवतानामस्त्येव मध्वादि विसृज्य योगः ॥ ११ ॥[26]

कर्माङ्गभूतोपनयाद्यभावात् सर्वत्र शूद्रस्य न चाधिकारः ।[27]

यदेजनं प्राणनिमित्तकं स प्राणः परात्माऽखिलकम्पनाच्च ॥ १२ ॥[28]

श्रुतौ परं ज्योतिरिह श्रुतं तत् ब्रह्मैव तस्योत्तरवाक्ययोगात् ।[29]

नाम्नश्च रूपस्य च यः प्रवोढाऽऽकाशः परात्मा तदसङ्गतोक्तेः ॥ १३ ॥[30]

योयं तु विज्ञानमयः परात्मा भेदेन निर्देशत एव जीवात् ।[31]

प्रधानमेवेह जगन्निदानं तत्कल्पितं हीति न युज्यते तत् ॥ १४ ॥[32]
मन्वादिनोक्तं सकलं च युक्तं तत्कापिलोक्तं हि न युज्यतेऽत्र ।[32]

एकामजामित्यपि न प्रधानं परात्मसम्भूतगुणात्मिकेयम् ॥ १५ ॥[33]
यथाविशेषात् चमसार्थबोधो न स्यात्तथाऽजार्थ इतीह वक्ति ।[33]

यत् पञ्चपञ्चेति न सांख्यरीतिः संख्याश्रयेप्यात्मनभोधिकोक्तेः ॥ १६ ॥[34]

[35]
ृष्टौ विगानं न च सृष्टिकर्तर्यस्तीति हेतुर्जगतः परात्मा।
[36]
ो वै बलाकेत्युपदिष्टकर्ता स्वाराज्यगामिश्रुतितः परात्मा ॥ १७ ॥
[37]
ोतव्य आत्मेत्युपदिष्ट आत्मा तत्तत्यवाक्यान्वयतः परात्मा ।
[38]
ाटस्य मृत्सा घटकृच्च यद्वत् ब्रह्म प्रपञ्चस्य निमित्तमेव ॥ १८ ॥
[38]
ावं ह्युपादानमपीति युक्तं यज्ज्ञानतोन्यस्य च वेदनादेः ।
[39]
ाण्वादि हेतूक्तिविवादशीलाः सर्वे निरस्ता गतयुक्तिभिस्ते ॥ १९ ॥

अथ द्वितीयाध्यायः ॥

[40] [41]
न्वादि साधुस्मृतयः प्रमाणं योगोक्ततत्वादि न मानमेव ।
[42]
द्वोमयात् कीटजनिर्नराच्च केशादि जन्मास्ति तथा परात्मा ॥ २० ॥
[42] [43]
वेलक्षणं कारणमस्य शिष्टावादा निरस्ताह्यमुना नयेन ।
[44]
ोक्तुश्च भोग्यस्य विभागसिद्धिः सिन्धूर्मिफेनादिव तत्र युक्ता ॥ २१ ॥
[45]
ब्रह्मणोन्यत् परमार्थतोस्ति तस्मादनन्यत्वमिहोच्यते तत् ।
[46]
ृतादिकार्याकृतरूपदोषः न ब्रह्मणोयं प्रसजेन्मृषा सः ॥ २२ ॥
[47]
ोरस्य दध्यादिवदेव सृष्टौ सामग्र्यपेक्षा न परेशितुश्च ।
[48]
ब्रह्म स्वयं चेत् परिणामि कृत्स्नप्रसक्तिता सावयवत्वता च ॥ २३ ॥
[48]
श्रुतिप्रमाणादुभयं न दुष्टं शुद्धप्रतीत्यै परिणामवादः ।
[49]
ामग्र्यभावेपि च सर्वशक्तियुक्तं परं ब्रह्म सृजत्यमूनि ॥ २४ ॥
[50]
ाचेतनं ब्रह्म नृपादिवत्तत् सृष्टिं विधायात्र करोति लीलाम्।
[51]
ाता यथा पूर्वमिति श्रुतेश्च सृष्टौ न दोषः परमेश्वरस्य ॥ २५ ॥

सचेतनब्रह्मनिदानवादे सर्वोपपत्तिर्न परत्र चेति ।

न सांख्यवादे रचनोपपत्तिः वैशेषिकानामपि दोष एव ॥ २६ ॥

जगन्निदानं परमाणुरेवेत्ययं च पक्षः सुनिरस्त एव ।

वैनाशिकोक्ता समुदायसृष्टिः न युक्तियुक्ता सुगतो निरस्तः ॥ २७ ॥

तथाऽऽर्हतं चापि मतं निरस्तं न तार्किकोरीकृत ईश्वरश्च ।

प्रद्युम्नसंकर्षणजन्ममुख्या प्रकल्पना सात्वतजा न युक्ता ॥ २८ ॥

उत्पद्यते खं परमेश्वरादित्यवोचदेवं स सदागतिश्च ।

उत्पत्त्यभावस्सत एव चोक्तः ब्रह्मैव तेजो जनकं ततोपाम् *॥ २९ ॥

* उत्पत्तिरिति शेष

अद्भ्यश्च भूमिः परमेश्वरस्य ध्यानाच्च तद्रूपतया विसृष्टिः ।

उत्पत्तिरीतेश्च विपर्ययेण क्रमेण भूम्यादि लयः प्रतीतः ॥ ३० ॥

भूतक्रमस्याप्यविरोध एव विज्ञान चेतो जनिराह मध्ये ।

जीवस्य चोत्पत्तिलयादिवादः शरीरसंबन्धनिमित्तकस्सः ॥ ३१ ॥

नोत्पद्यते नाम कदाचिदात्मा स नित्यचैतन्य इति त्रयीवाक् ।

उपाधिसङ्गादणुतादिगामी जीवो विभुर्ब्रह्म महान् श्रुतेश्च ॥ ३२ ॥

शास्त्रार्थवत्वाय स एव कर्ता सा कर्तृतोपाधिकृतेति विद्यात् ।

कर्तृत्वमस्यापि परेशनिघ्नं वह्निस्फुलिङ्गा इव तेऽम्शभूताः ॥ ३३ ॥

प्राणाश्च सर्वेपि परात्मजाताः प्राणास्तथैकादश नाधिकास्ते ।

ते चाणवश्श्रेष्ठ इति प्रसिद्धः विकारभूतस्य च वायुरेव ॥ ३४ ॥

प्राणश्च मुख्योणुरुदीरितोयं[83] स जीव देवैरधिविष्ठितास्ते[84] ।
एकादशामी स च मुख्यवायुः त इन्द्रियाण्येव पृथक् पृथक् च[85] ॥ ३५ ॥
त्रिवृत्कृतं व्याकरणं परात्मा करोति नामादि[86] न जीव इत्थम् ।
द्वितीयकाध्यायगतेषु पत्सु चतुर्षुचार्था इहसंगृहीताः ॥ ३६ ॥

अथ तृतीयाध्यायः ॥

देहान्तरं गच्छति भूतसूक्ष्मैः[87] जीवोऽवरोहत्यवशिष्टकर्मा[88] ।
अनिष्टकृच्चन्द्रमसं न याति व्रीह्यादि[89] साम्यं भजतेऽवरोही[90] ॥ ३७ ॥
व्रीह्यादितः प्राग्गगनादिभावे स्वल्पं च कालं स हि तिष्ठतीति[91] ।
जीवान्तराधिष्ठितधान्यकादौ संश्लेषमात्रं भजते स कर्मी[92] ॥ ३८ ॥
मायैव सन्ध्ये च रथादि सृष्टिः सुप्तिश्च नाड्यादि[93] समुच्चयोस्य[94] ।
सुप्तप्रबुद्धोपि स एव कर्मी सुप्तार्धसम्पत्तिरिहापि मूर्च्छा[95][96] ॥ ३९ ॥
ब्रह्मैकलिङ्गं श्रुतिदृष्टमेतत् तन्निर्विकल्पं न विरुद्धलिङ्गम्[97] ।
यत् ब्रह्मणोन्यत् प्रतिभाति तत्रेत्यथात आदेश इति ब्रवीति[98] ॥ ४० ॥
न सेतुशब्दः परमात्मनोन्यत् ब्रवीति सेतुश्च परस्स आत्मा[99] ।
फलप्रदं ब्रह्म न कर्म नान्यत् नश्यत्स्वभावं तदचेतनं च[100] ॥ ४१ ॥
सर्वागमान्तेषु च याश्च विद्याः सर्वास्समा रूपफलाद्यभेदात्[101] ।
गुणोपसंहार इहेष्यतेऽर्थे तुल्ये च विद्यैक्यफलं त्वमुत्र[102] ॥ ४२ ॥
छान्दोग्यगोद्गीथविशेषविद्या ह्याराण्यकोक्तेः पृथगेव सेति[103] ।
ओमित्यदश्चात्र विशेषणं तत् उद्गीथकाङ्गं त्विति चिन्तनीयम्[104] ॥ ४३ ॥

ये प्राणविद्ये श्रुतिगे च तुल्ये गुणानुषङ्गेण विचिन्तनीये [105] ।
आनन्दविज्ञानघनादि धर्माः ब्रह्मप्रतीतौ नियमेन चिन्त्याः [106] ॥ ४४ ॥
यश्चिन्तनीयः पुरुषः परस्स आत्मा च सर्वेभ्य इति ब्रवीति [107] ।
य ऐतरेये श्रुत आत्मशब्दः परस्स आत्मैव परश्रुतौ च [108] ॥ ४५ ॥
छान्दोग्यवाजिस्थसदात्मशब्दौ तुल्याविहेत्यर्थ इति ब्रवीति [108] ।
वासोविधानार्थमनन्नतोक्तिः शुद्ध्यर्थतीर्थेष्विति चिन्तनीयम् [109] ॥ ४६ ॥
शाण्डिल्यविद्ये च समे गुणोपसंहार एवात्र विधेय इत्थम् [110] ।
स्थानप्रभेदाद्विरक्षिचेह रव्यक्षिविद्ये च विभिन्न एव [111] ॥ ४७ ॥
यत्संभृतिज्येष्ठगुणादि भानं यत्र श्रुतं तत्र तु नेतरत्र [112] ।
छान्दोग्यगारण्यकपूरुषाख्यविद्ये विभिन्ने गुणभेदसत्वात् [113] ॥ ४८ ॥
सर्वं प्रविध्य प्रभृतीति मन्त्रजातं न विद्याङ्गमिदं परत्र [114] ।
पुण्यप्रहाणं यदिह श्रुतं तत् चोपायनोक्तिश्श्रुतिशेषमेव [115] ॥ ४९ ॥
विधूननं चालनबोधकं न किन्तु प्रहाणं त्विति वर्णनं वा [115] ।
देहाद्विनिष्क्रान्तिसमानकालं पुण्यादिहानं सगुणस्थितस्य [116] ॥ ५० ॥
यो देवयानः क्वचिदर्थवान् सः विशुद्धनिष्ठस्य स नेति युक्तः [117] ।
या देवयानाध्वगतिश्श्रुता सा विद्यासु चिन्त्या सगुणासु नित्यम् [118] ॥ ५१ ॥
विद्या सुसिद्धौ विदुषश्शरीरनाशे तु कैवल्यसुसिद्धिरेव [119] ।
केषांचिदेवात्र विपश्चितां सा पुनश्शरीरान्तिरिहाधिकारे [120] ॥ (स्थितानामिति-शेषः
या चाक्षरत्वादि निषेधबुद्धिः सर्वत्र विद्यास्वनिवर्तनीया [120] ।
उभौ सुपर्णौ च ऋतं पिबन्तावित्येतयोरैक्यमिहोच्यते च [121] ॥ ५२ ॥

उषस्तपृच्छा च कहोलपृच्छा तुल्येति विद्यैक्यमिह[122] ब्रवीति ।
त्वं वा अहं सोहमहं त्वमादि चिन्ता विभिन्नश्रुतिगापि[123] तुल्या ॥ ५४ ॥

सत्याख्यविद्ये फलरूपभेदात् भिन्नेत्यतो ध्यानमपीह[124] भिन्नम् ।
चेतो गृहाद्यैक्यमिह श्रुतं तत् ब्रह्मैव दहं[125] तत एव चैक्यम् ॥ ५५ ॥

भुङ्क्ते यदा ब्रह्मविदत्र चैव प्राणाग्निहोत्रं[126] कुरुतादलोपात् ।
कर्माश्रयोद्गीथविचिन्तनादि फलान्तरेच्छावत[127] एव सिद्धम् ॥ ५६ ॥

संवर्गवायुश्च परत्रवायुः तुल्योपि भेदेन[128] विचिन्तनीयः ।
मनश्चिदाद्याश्च मनोमयास्ते विद्यात्मका[129] एव न यागशेषाः ॥ ५७ ॥

देहातिरिक्तात्मसमर्थनं[130] च ह्यङ्गाश्रयाणामनुवृत्तिरेव[131] ।
वैश्वानरात्मा[132] च विशिष्ट एव ध्येयो हि भूमा क्रतुवच्चसाङ्गः ॥ ५८ ॥

वैश्वानरात्मेव समस्य विद्याः नोपासितव्या[133] विविधा हि विद्याः ।
या का च विद्या फलसाधनाय प्रतिगृहीता फलदा[134] तु सैव ॥ ५९ ॥
अतश्च विद्यासु विकल्प एव समुच्चयो नेति[134] निगद्यतेऽत्र ।
काम्यास्तु विद्याश्च यथेच्छमेव[135] कर्माङ्गभूतास्तु[136] यथाश्रयास्ताः ॥ ६० ॥

विद्या स्वतन्त्रा फलदेति[137] सिद्धं विद्योर्ध्वरेतस्सु च[138] सिद्ध्यतीति ।
उद्गीथविद्याश्रुतरस्यताद्याः उपासनार्था[139] स्तुतिगोचरा न ॥ ६१ ॥

वेदान्तवाक्यस्थकथाश्च विद्याविधायका[140] एव परिप्लवा न ।
अग्नीन्धनादीननपेक्ष्य विद्या फलं[141] ददातीति जगाद चात्र ॥ ६२ ॥

शास्त्रीयसवर्णाश्रमकर्मसज्ञापेक्षा यथार्हा भवतीह विद्या ।
विद्यावतापीह निषिद्धमन्नं प्राणात्यये स्वल्पफलादि भोज्यम् ॥ ६३ ॥
यज्ञादिकर्माऽऽश्रमिणाऽपि कार्यं विद्यास्थितेनापि सहायसिद्धयै ।
द्रव्यादिसंपद्रहितप्रमीतदारादयस्तेष्वपि साऽस्ति विद्या ॥ ६४ ॥
तुर्याश्रमं प्राप्य ततश्च्युतिर्न सा नैष्ठिकस्यापि सतस्समाना ।
ये प्रच्युतास्ते सुबहिष्कृताश्च ऋत्विक्क्रियाज्ञाश्रयचिन्तना सा ॥ ६५ ॥
विद्यावतो मौनविधिश्च सिद्धः ज्ञानी च डम्भादिविवर्जितश्च ।
विद्याफलं त्वैहिकमत्र जन्मन्यमुत्र वाऽप्रस्तुतबन्धके तत् ॥ ६६ ॥
मुक्त्याह्वयं श्रेष्ठफलं तु विद्यासाध्यं न चोत्कर्षनिकर्षवत्तत्।
तृतीयकाध्यायगतेषु पत्सु चतुर्षुचार्थाः इह संगृहीताः ॥ ६७ ॥

अथ चतुर्थाध्यायः ॥

ज्ञानस्यचावृत्तिरिहार्थदात्मेत्युपासना सापि न च प्रतीके ।
अर्कादिषु ब्रह्ममतिर्हि युक्ता ह्युद्गीथकेऽर्कादिमतिश्च युक्ता ॥ ६८ ॥
उपास्तिमासीन इह प्रकुर्यात् एकाग्रता यत्र स एव देशः ।
शरीरपातावधि चात्मचिन्ता यद्ब्रह्मलाभे सति पापनाशः ॥ ६९ ॥
पुण्यस्य नाशोपि तथैव पाते प्रारब्धकार्यं न हि नश्यतीति ।
नित्याग्निहोत्रादि न नश्यतीह विद्यासुसिद्धयै भवतीति चोक्ता ॥ ७० ॥
यत् ज्ञानपूर्वं विहितं च कर्म विद्या च मोक्षाय सुसाधनं तत् ।
भोगेन चारब्धमिहानुभूय कैवल्यमाप्नोति विशेषविज्ञः ॥ ७१ ॥

प्रयाणकाले सगुणात्मनिष्ठविपश्चितो वाङ्मनसि[168] प्रलीना ।
प्राणे मनश्च प्रविलीयते[169] स प्राणश्च जीवे[170] स च भूतसूक्ष्मे ॥ ७२ ॥

नाडीप्रवेशो विदुषोधिकोस्ति[171] तत्पूर्वमेकैव गतिर्द्वयोश्च ।
सप्राणजीवस्य लयः परस्मिन्[172] सुषुप्तिकाले च यथा तथाऽत्र ॥ ७३ ॥

विशुद्धविज्ञानपरात्मनिष्ठः[173] नोत्क्रान्तिमाप्नोति परात्मभूतः ।
परात्मवित्प्राणगणः परस्मिन्[174] संलीयते सोप्यविभाग[175] एव ॥ ७४ ॥

गुण्यात्मनिष्ठस्य च हार्द[176] एव प्रकाशयत्यत्र च मूर्धनाडीम् ।
उत्क्रान्तविद्वानपि रश्मिसृत्या[177] प्रयाति रात्रावपि रश्मिसत्त्वात् ॥ ७५ ॥

परेऽयनेऽपि प्रमृतो विपश्चित्[178] तां देवयानाख्यसृतिं समेति ।
उपासकस्यार्चिरहर्मुखो[179]ऽध्वा तत्रापि चाब्दात्[180] परमेव वायुः ॥ ७६ ॥

विद्युत्परं तीर्थपतिर्निविष्टः[181] वोढार एतेऽर्चिरहर्मुखाश्च[182] ।
कार्याह्वयं ब्रह्म च ये स्मरन्ति[183] तानेव ते ब्रह्म नयन्ति नान्यम् ॥ ७७ ॥
परं तु यद्ब्रह्म च ये स्मरन्ति[183] तानेव तद्ब्रह्म नयन्ति नान्यम् ।

केचित् प्रतीकव्यतिरिक्तमन्यत्[184] ब्रह्मेति तानेव नयन्ति देवाः ॥ ७८ ॥

स्वेनैव रूपेण परात्मभावः[185] स्वकण्ठचामीकरलाभवत् सः ।
मुक्तः परात्माऽपृथगेव भूतः[186] यत्तत्वमस्यादि विशेषविज्ञः ॥ ७९ ॥

ब्राह्मेण रूपेण च केवलेन[187] चैतन्यरूपेण विमुक्त आस्ते ।
मुक्तस्स्वसंकल्पत[188] एव सृष्ट्वा भुङ्क्ते च भोगानखिलान् विमुक्तौ ॥ ८०॥

मुक्तस्य देहेन्द्रियवर्ग आस्ते स एकधेत्यादि च[189] वेदवाक्यात् ।
अनेक देहाश्रयणेऽपि चात्मा प्रदीपवत्तत्र च[190] तत्त्व भाति ॥ ८१ ॥
मुक्तौ गुणिब्रह्मविचिन्तकस्य सृष्ट्यादिवर्जं परमात्मसाम्यम्[191] ।
चतुर्थकाध्यायगतेषु पत्सु चतुर्षु चार्था इह संगृहीताः ॥ ८२ ॥
व्यासोदिताध्याय चतुष्टयेषु श्रीशंकराचार्यगुरूपदिष्टाः ।
ये सूत्रभाष्ये प्रतिभान्ति तेऽर्थाः रङ्गार्यनाम्ना विदुषा गृहीताः ॥ ८३ ॥

सगुणब्रह्मनिष्ठस्य सृष्टिवर्जं स्वसाम्यता ।
शुद्धब्रह्मणि निष्ठस्य स्वेनैक्यं फलमच्युते ॥ ८४ ॥
भाष्येऽधिकरणानां च संख्यैकनवतिश्शतम् ।
सूत्रसंख्या पञ्चपञ्चाशच्चपञ्चशतानि ॥ ८५ ॥
(अधिकरणानि १९१ सूत्राणि ५५५)

इति काळि. वङ्गीपुरं, मतत्रयनिरूपक-रङ्गाचार्याणां कृतिषु
श्रीशङ्कर-सूत्रभाष्याधिकरणार्थसंग्रहः ॥
शुभं भूयात् ॥

(श्लोकमध्यगता संख्या अधिकरणसंख्याज्ञापिका)

॥ श्रीः ॥

श्रीमते लक्ष्मीनृसिंहपरब्रह्मणे नमः

सिद्धान्तत्रय ब्रह्मसूत्राधिकरणार्थसंग्रहः

विशिष्टाद्वैतं ॥

श्रीनृसिंहपदांभोजसमाराधनतत्परम् ।
श्रीरङ्गशठकोपाख्ययतिराजगुरुम् भजे ॥

अहोबिलमठाधीश श्रीनिवासयतीश्वरम् ।
नत्वाऽण्णावाजपेयादीन् संग्रहो लिख्यतेऽधुना ॥ १ ॥

श्रीभाष्यस्याधिकरणनिर्णीतार्थप्रकाशकः ।
अपर्याप्तामृतब्रह्मस्तवोयं लिख्यते मया ॥ २ ॥

सूत्रसंख्या पञ्चचत्वारिंशत्पञ्चशतानि च ।
संख्याधिकरणानां तु षट्पञ्चाशच्छतं तथा ॥ ३ ॥

सूत्राणि ५४५; अधिकरणानि—१५६

प्रथमाध्यायः ।

गुरूपसत्तिं प्रविधाय भक्त्या ब्रह्मोपदिष्टं गुरुणा[1] शृणोतु ।
सर्गादिकर्ता[2] जगतस्त्वमेव[3] योनिस्त्रयीणां[4] पुरुषार्थरूपी ॥ ४ ॥
त्वं न[5] प्रधानं श्रुतिवागतीतानन्दस्वरूपीति[6] च कथ्यतेऽस्मिन् ।
आदित्य[7]मध्ये च हिरण्मयोसि[8] ह्याकाशवाच्योस्यसु[9]शब्दवाच्यः ॥ ५ ॥

(श्लोकमध्यगता संख्या अधिकरणसंख्या ज्ञापिका)

ज्योतिः परं भासि दिवः[10] परं च शचीपतिप्राणपदाभिधेयः[11] ।
ब्रह्मेति सर्वं वदति श्रुतिस्सा[12] चराचरात्ताऽक्षिणि[13] पूरुषश्च[14] ॥ ६ ॥
भूरादि सर्वेषु वितिष्ठसेऽन्तर्यामी[15] ह्यदृश्यादि गुणार्णवश्च[16] ।
वैश्वानरात्मा[17] द्युरसान्तरिक्षप्राणादि[18] वेश्मापि[19] चकाधि भूमा ॥ ७ ॥
किञ्चाक्षराख्यः[20] परपूरुषश्च[21] दह्रान्तराकाशपदाभिधेयः[22] ।
अङ्गुष्ठमात्रः[23] पुरुषः परात्मा देवाद्युपास्योष्टवसुस्ततोसि[24][25] ॥ ८ ॥
शूद्रानुपास्योऽग्निमुखाऽमराश्च[26] त्वत्तस्तु बिभ्यत्यनिशं[28a] च सर्वे ।
त्वं रूपनाम्नोर्जगतः प्रवोढा[27] ह्याकाशशब्देन च विश्रुतोसि ॥ ९ ॥
अव्यक्तशब्दप्रतिपादितोसि[28] न सांख्यनिष्ठस्य विमुक्तिदश्च ।
त्वदात्मिकाजां च न वेत्ति सांख्यः आपाततो वेदविचाखादी[29] ॥ १० ॥
पञ्चेति संख्याश्रयणेपि 'यस्मिन् पञ्चे'तिवाक्ये[30] च भवान् विभाति ।
सृष्टयादिवाक्ये बहुधापि भिन्ने त्वत्कारणत्वे[31] न विवाद एव ॥ ११ ॥
अजातशत्रुश्च भवन्तमाह ब्रह्मेतिवेद्यं[32] जगतो निदानम् ।
'न वा अरे पत्युरि'ति श्रुतौ यः आत्मेतिशब्दस्त्वयि[33] मुख्यवृत्तः ॥ १२ ॥
सर्वप्रपञ्चस्य भवन्तमेव निमित्तमाहुः[34] प्रकृतिं च वेदाः ।
सर्वागमान्ताश्च भवन्तमेव व्याख्यान्ति[35] शिष्टा अपि पूर्वरीत्या ॥ १३ ॥
उपक्रमाध्यायगतेषु पत्सु चतुर्षु भाष्यार्थविचार एषः ।

अथ द्वितीयाध्यायः ।

मन्वादि[36] साधुस्मृतिदृष्टरूपः[37] योगोक्त्यगम्यश्च[38] विलक्षणस्त्वम् ॥ १४ ॥

बाह्यैरदृष्टश्च परात्मजीवविभागवान् कारणकार्यरूपः ।
हितादिकार्याकरणादिदोषशून्यश्च सामग्र्यनपेक्षसृष्टिः ॥ १५ ॥
कृत्स्नप्रसक्त्यादि समस्तदोषहीनश्च लीलाफलसृष्टिकर्ता ।
सामर्थ्यवान् त्वं रचनाविशेषे पराणुहेत्वादि निरासकोसि ॥ १६ ॥
क्षित्यम्बुतेजोऽनिलसंहती द्वे जगन्निदानं त्विति वादिभेत्ता ।
ज्ञानातिरिक्तार्थपदार्थसत्ता नास्तीति दुर्वादिमताद्विवज्रः ॥ १७ ॥
शून्यादिवादप्रतिषेधकस्त्वं विरुद्धधर्माश्रयवादिविद्विट् ।
शैवागमोक्तार्थनिरासदक्षः त्वं पञ्चरात्रागममानवादी ॥ १८ ॥
वियत्समीरप्रभवस्त्वमेव तेजोऽप्पृथिव्यादि पिता त्वमेव ।
जीवात्मनित्यत्वविबोधकस्त्वं ज्ञानाणुधर्मीयमिति ब्रवीषि ॥ १९ ॥
कर्तोऽयमात्मेति च संब्रवीषि त्वद्दत्तकर्तृत्ववहीति जीवः ।
जीवाश्च सर्वे भवदंशभूताः त्वमिन्द्रियाणां जनकोखिलानाम् ॥ २० ॥
एकादशानामपि चेन्द्रियाणां प्राणानणूनेव करोषि सर्वान् ।
वायुह्यवस्थन्तरवान् पृथक् च तं वायुमेवाणुमिह ब्रवीषि ॥ २१ ॥
भवद्भृतं ज्योतिरधिष्ठितृत्वं श्रेष्ठातिरिक्तानि त इन्द्रियाणि ।
त्वय्येव सृष्टे अपि नामरूपे त्रिवृत्कृतापः पृथिवीं च तेजः ।
द्वितीयकाध्यायगतार्थ एषः सुखेन बोधाय मया गृहीतः ॥ २२ ॥

अथ तृतीयाध्यायः ॥

देहान्तराप्तौ च सुसूक्ष्मदेही कृतात्यये कर्मसहाय एति ।
यागाद्यकर्ता न च चन्द्रगामी खादेस्तुलामाप्य भुवं समेति ॥ २३ ॥

तिष्ठन् स खादौ[73] चिरकालमेति त्रीह्यादि संश्लिष्ठ[74] इहावरोहेत् ।
स्वप्ने पदार्थां[75] भगवद्विसृष्टाः जीवस्य सुप्तिः परमात्मनीति[76] ॥ २४ ॥
सुप्तप्रबुद्धः स हि जीवएव मूर्च्छा[77] मृतेरर्धदशा[78] समाना ।
सदा च सर्वत्रगतः परात्मा निर्दोषकल्याणगुणाकरस्सः[79] ॥ २५ ॥
ब्रह्मस्वरूपं त्वचिदित्यवोचत्[80] ब्रह्मापृथग्भावत एव तद्धि ।
सेत्वर्थकश्चापि परस्स आत्मा फलप्रदस्तत्तनुरेव विष्णुः[81][82] ॥ २६ ॥
कृत्स्नागमान्तोत्थमुपासनं तत् एकं ततस्तत्र गुणानुषङ्गः[83] ।
उद्गीथविद्ये स्वविभेदहेतुसत्वाद्विभिन्ने इति निश्चिते द्वे[84] ॥ २७ ॥
ये प्राणविद्ये च तयोरभेदः[85] आनन्दसत्त्वादि[86] गुणीति चिन्त्यः ।
प्राणस्य वासस्त्वविधानमप्सु[87] शाण्डिल्यविद्यैक्यमभेददृष्टेः[88] ॥ २८ ॥
स्थानादिभेदात् रवि-नेत्रविद्ये[89] भिन्ने च भृत्यादि[90] च यत्र तत्र ।
'तस्यैवमि'त्यादि यजुर्गता या छान्दोग्यगायाः पृथगेव[91] विद्या ॥ २९ ॥
'विध्यादि'मन्त्राह्यभिचारशेषाः[92] उपायनार्थाश्च[93] विहानिरत्र ।
देहादपक्रान्ति समानकालं निश्शेषकर्मक्षय उच्यतेऽत्र[94] ॥ ३० ॥
ये ब्रह्मविद्याधिकृतास्तु तेषां तुल्यार्चिरादिर्गतिरित्यधीता[95] ।
अस्थूलताद्यैश्च गुणैर्विशिष्टं ब्रह्मानुचिन्त्यं त्विति चोक्तमत्र[96] ॥ ३१ ॥
उषस्तविद्या च कहोलविद्या तुल्यैव विद्ये दहराख्यके द्वे[97][98] ।
उद्गीथचिन्तानियमो न चात्र दहस्य चिन्ता गुणचिन्तनार्था[99][100] ॥ ३२ ॥

सर्वत्र[101] नारायण एव चिन्त्यः विद्यामया एव[102] मनश्चिदाद्याः ।
जीवस्वरूपं च विमुक्तिकाले यत्प्राप्यरूपं तदिहैव[103] चिन्त्यम् ॥ ३३ ॥
अज्ञावबद्धाश्च समस्तचिन्ताः सर्वत्रसक्ता इति[104] चाविरोधात् ।
वैश्वानरस्सर्वविशिष्ट[105] एव ध्येयश्च विद्या विविधाश्च[106] भेदात् ॥ ३४ ॥
विद्याविकल्पो न समुच्चयोस्य ध्यातुर्विमुक्ताविह[107] साधकस्तु ।
अज्ञावबद्धासु यथेच्छमेव ह्युपासनं[108] चाह तृतीयपादे ॥ ३५ ॥
विद्यैव[109] युक्ता पुरुषार्थदेति चोद्गीथविद्यासु[110] रसादिदृष्टिः ।
श्रुत्यन्तविज्ञातकथा च सर्वा विद्याविधात्री[111] न नृपार्थिकेति ॥ ३६ ॥
विद्योर्ध्वरेतस्सु[112] च केवलस्वकर्माद्यपेक्ष्यैव सुसिद्ध्यतीति ।
गृहस्थनिष्ठस्य तु[113] सर्वकर्मसापेक्षया सिद्ध्यति चात्मविद्या ॥ ३७ ॥
शमादि चाङ्गं गृहिणश्च[114] सिद्धं आपत्सु[115] सर्वान्नभुजां न दोषः ।
मोक्षाभिलाषारहितेन[116] कर्मानुष्ठेयमन्येन* सहायतोक्तेः ॥ ३८ ॥
विद्याधिकारश्च[117] भवेत् प्रमीतदारस्य चापत्सु कथंचिदुक्तः ।
भ्रष्टाश्रमाणामधिकार[118] एव विद्यासु नास्त्यत्र बहिष्कृतास्ते ॥ ३९ ॥
अङ्गाश्रयोपास्तिरपीह ऋत्विक्[119] कार्येति मौनं सहकारिहेतु[120] ।
स्वगौरवाच्छादनमैहिकादि[121] सिद्ध्येन्निरोधेऽसति दर्शनात्[122] तत् ॥ ४० ॥
विमुक्तिरूपं फलमत्र विद्या सिद्धौ[123] सुसिद्ध्येदिति तुर्यपादे ।
चतुर्षु पादेषु तृतीयगेषु विचारितार्था इह संगृहीताः ॥ ४१ ॥

(*अन्येन=मुमुक्षुणा)

अथ चतुर्थोऽध्यायः ॥

आवृत्तविज्ञानमिहात्मलाभे[124] स्वात्मान्तरात्मेति च तस्य[125] चिन्ता ।
नामाद्युपास्तौ[126] न परात्मलाभः उद्गीथकेऽर्कादि[127] विचिन्तनीयम् ॥ ४२ ॥
उपासना चासननिष्ठितस्य[128] मनोनुकूले भवतीह देशे ।
आवृत्तविज्ञानमपीह[129] यावत् शरीरपातं करणीयमेव ॥ ४३ ॥
उपासनोपक्रम एव[130] पापप्रहाणमुक्तं सुधियामिहेति ।
शरीरपातेऽखिलपुण्यनाशोऽप्रारब्धकार्ये[131] तु विनश्यतो द्वे[132] ॥ ४४ ॥
नित्याग्निहोत्रादि[133] तु कार्यमेव विद्यासमाप्त्यै विदुषां स्वकर्म ।
आरब्धकार्यं[134] सुकृतं च पापं फलानुभूत्यैव निरस्यमत्र ॥ ४५ ॥
वागिन्द्रियं[135] चेतसि युज्यतेऽत्र प्राणे[136] मनस्सोपि[137] च जीव एव ।
जीवेन[138] युक्तस्य च भूतसूक्ष्मे[139] ह्युत्क्रान्तिरेषा सदसत्समाना ॥ ४६ ॥
सप्राणजीवस्य परात्मसङ्गः स्वविश्रमायेति[140] निगद्यतेऽत्र ।
परात्मसङ्गो[141] ह्यविभागरूपः मूर्धन्यनाड्योत्क्रमणं[142] बुधानाम् ॥ ४७ ॥
निष्क्रान्तविद्वानपि सूर्यरश्मिद्वारैव[143] चामोति परात्मलोकम् ।
रात्रावपीनस्य च रश्मिसत्ता[144] मृतस्सुधीरेत्ययने[145] परे *तत् ॥ ४८ ॥
एकाध्वनार्चिर्दिवसादिनैति[146] विद्वानथाब्दात्[147] परमेति वायुम् ।
जलाधिनाथं तटितः परं[148] च वोढार एतेऽर्चिरहर्मुखास्ते[149] ॥ ४९ ॥

---

*(तत्=ब्रह्मैव)

ब्रह्मात्मकं स्वं प्रकृतेर्वियुक्तं ब्रह्माप्युपास्ते च नयन्ति ते तम् ।
योसावुपास्ते परमेव कार्यं न तान्नयन्तीति वदत्यमुष्मिन् [150] ॥ ५० ॥

तिरोहितं यन्निजरूपमस्ति तदेव चाविर्भवतीह मुक्तौ [151] ।
सर्वांश्च कामानविभक्त एव समश्नुते मोक्ष इति प्रकल्पितम् [152] ॥ ५१ ॥

श्रुतौ य आत्मेति गुणाष्टकं तत् तद्युक्त आत्मा प्रतिभाति मुक्तौ [153] ।
परात्मसंकल्पविमिश्रनैजसंकल्पतस्सृष्टपदार्थभोगः [154] ॥ ५२ ॥

मुक्तस्य तन्वादिकमस्ति तच्च त्रिधा चतुर्धा नवधेत्यनेकम् [155] ।
जगत्पतित्वादि विसृज्य साम्यं परात्मभोगे प्रतिपाद्यतेऽत्र [156] ।
चतुर्षु पादेषु तुरीयगेषु विचारितार्थी इह संगृहीताः ॥ ५३ ॥
श्रीभाष्यतात्पर्यसुसंग्रहोऽयं सुखेन बोधाय सुपण्डितानां ।
रङ्गार्यनाम्ना लिखितो बुधेन जयत्वसौ संसदि पण्डितानाम् ॥ ५४ ॥
इत्थं चतुर्भिरध्यायैः व्याससूत्रार्थबोधकैः ।
श्रीभाष्योक्तार्थसहितैः स्तुतश्शार्ङ्गिन् प्रसीद मे ॥ ५५ ॥
वेदव्यासमहर्षिणा विरचितं यद्ब्रह्मसूत्रात्मकम्
तद्व्याख्यां लिलिखुश्च पूर्वगुरवः तात्पर्यविज्ञाश्च षट् ।
तेऽमी यादवभास्करौ प्रथमजौ श्रीशंकराचार्यकः
मध्वार्यो यतिराजलक्ष्मणमुनिः श्रीनीलकण्ठाह्वसन् ॥ ५६ ॥
तद्ग्रन्थाभ्याससंप्राप्तस्वल्पज्ञानोप्यहं मुदा ।
भाष्यत्नयार्थं संगृह्य प्रालिखं सुधियां मुदे ॥ ५७ ॥

इति काळि, वङ्गीपुरं, रङ्गाचार्याणां कृतिषु
श्रीभाष्याधिकरणार्थसंग्रहः संपूर्णः ॥
शुभं भूयात्

॥ श्रीः ॥

सिद्धान्तत्रय-
ब्रह्मसूत्राधिकरणार्थसंग्रहः

द्वैतभाष्याधिकरणार्थसंग्रहः ॥

प्रथमाध्यायः ॥

लक्ष्म्याऽऽश्लिष्टं *क्षाभिमानिदेवं मध्वार्यसद्गुरुम् ।
नत्वा भाष्याधिकरणसंग्रहोयं विलिख्यते ॥ १ ॥

ओं

विष्णुर्जिज्ञास्य उक्तः[1] सच सकलपिता[2] सोपि शास्त्रैकगम्यः[3]
तस्मिन्[4] वेदान्वयात् सः श्रुतिगतपदवाच्यस्स एवेक्षणीयः[5] ।
अभ्यासाद्विष्णुरानन्दमय[6] उदधिशार्यीति[7] चाकाशवाच्यः[8]
लीङ्गात् प्राणश्च विष्णुः[9] विचरणकथनात् ज्योतिरप्याह[10] विष्णुम् ॥ २ ॥
छन्दस्स्वरूपोयमिति[11] ब्रवीति ज्योतिर्हरिः[12] प्राणपदाभिधेयः ।
ब्रह्मेति[13] सर्वत्र परात्मरूढः चराचराता च स एव[14] विष्णुः ॥ ३ ॥
गुहां[15] प्रविष्टौ हरिरेव रूपद्वयेन तस्थौ[16] नयनान्तरश्च ।
भ्वाद्यन्तरस्थोपि स विष्णुरेव[17] ह्यदृश्यधर्मादिगुणोपि[18] विष्णुः ॥ ४ ॥

---

*लक्ष्मीनृसिंह इत्यर्थः ।

श्लोकमध्यगता संख्या अधिकरणसंख्याज्ञापिका

वैश्वानरात्मापि च विष्णुरेव[19] द्युभ्वादि वेश्मापि स विष्णुरेव[20]।
भूमापि विष्णुस्सुसुखस्वरूपः खान्तस्य धृत्याऽक्षरवाच्य[21] एषः[22] ॥ ५ ॥
सच्छब्दवाच्यो हरिरैक्षतेति[23] कर्माभिधानात् दहरोऽपि[24] विष्णुः।
ज्ञानार्थिना प्रार्थितवस्तु[25] विष्णुः तस्यानुकृत्या हि विभाति सर्वम् ॥ ६ ॥
ईशानशब्दप्रमितोपि[26] विष्णुः अनन्तरं वामनशब्दसत्त्वात्।
विद्याधिकारोस्ति[27] हि देवतानां मध्वादिविद्यास्वधिकारभावः ॥ ७ ॥
पौल्लायणः[28] क्षत्रिय एव तस्मात् शूद्रस्य विद्याधिकृतिर्न चात्र।
यस्माज्जगच्चेजति येन वज्रं समुद्धृतं[29] सोपि च विष्णुरेव ॥ ८ ॥
हृद्यन्तरज्योतिरपीह[30] विष्णुः आकाशवाच्यस्स भिदोपदेशात्[31]।
स्वप्नादि कर्ता स च विष्णुरेव प्राज्ञेन सङ्गात्[32] च भिदोपदेशात् ॥ ९ ॥
श्रुतिश्रुतब्राह्मणशब्दवाच्यः[33] पत्यादिशब्दात् स च विष्णुरेव।
योऽव्यक्तशब्दादिरिह श्रुतिस्थः तदन्तरात्मानममुं[34] ब्रवीति ॥ १० ॥
ज्योतिःपदं कर्मविधायकं[35] तत् उपक्रमाद्विष्णुमिह ब्रवीति।
पञ्चेऽपि संख्याश्रयणेऽपि[36] पञ्चजनाश्श्रुतिस्था हरिमाहुरेवम् ॥ ११ ॥
यःकारणं कार्यमपीह[37] दृष्टं आकाशशब्दादिषु विष्णुरेव।
लोकस्थवेदस्थसमस्तशब्दाः[38] विष्णुं समाहुः प्रथमं परत्र ॥ १२ ॥
आकृष्य योगेन च तत्तदर्थबोधे सुशक्ता इति[39] युक्तमत्र।
प्रकृत्यदित्यादिपदाभिधेयः विष्णुः प्रतिज्ञाद्यनुकूललिङ्गात् ॥ १३ ॥
श्रुतिस्थशून्यादि पदानि योगात्[40] विष्णुं ब्रुवन्त्येव तथेतरेऽपि।
व्याख्यातरीत्यैव सुवेदितव्याः[40] विष्ण्वर्थका एव सुनिर्णयोत्र ॥ १४ ॥

अथ द्वितीयाध्यायः ॥

विष्ण्वादिनोक्तास्स्मृतयः[41] प्रमाणं रुद्रादिनोक्ता न फलाद्यदृष्टेः ।
वेदास्तथा भारतपञ्चरात्र-मूलाख्यरामायणमुख्यशास्त्रम्[41] ॥ १५ ॥

न तेषु दोषाः परिकल्पनीयाः नित्यास्स्वतो मानमिति प्रसिद्धम्[42] ।
विष्णुप्रदत्ताखिलशक्तयस्ताः मृदादिवस्तुष्वभिमानिदेवाः[43] ॥ १६ ॥

असज्जगद्बीजमिति श्रुतिश्च ब्रह्मैव चासत्पदमित्यवेहि[44] ।
जले जलं सिक्तमपीह वृद्धिः यथा पराप्तावपि जीवभेदः[45] ॥ १७ ॥

विष्णुस्स्वतन्त्रो न परानपेक्ष्य सृजत्यसौ 'किं स्विदि'ति श्रुतेश्च[46] ।
जीवस्य कर्तृत्वमयुक्तमेव सर्वत्र शक्तस्स हि विष्णुरेव[47] ॥ १८ ॥

स्वतन्त्रविष्णौ श्रुतिसिद्धशक्तौ न लोकयुक्त्यादि विवक्तुमर्हम्[48] ।
प्रयोजनार्था न च सृष्टिरस्य मत्तस्य नृत्यादिरिवेह लीला[49] ॥ १९ ॥

वैषम्यनैर्घृण्यवियुक्त एषः कर्माद्यपेक्ष्यैव फलप्रदाता[50] ।
श्रुतौ च लोके च विरुद्धरूपा धर्मा हरौ युक्ततया विभान्ति[51] ॥ २० ॥

प्रधानमेतज्जगतो न कर्तृ विष्णुं विना कस्य च नास्ति शक्तिः[52] ।
ब्रह्मस्थितं ब्रह्मविलीनमेतत् नान्यत्र तत्सेश्वरको निरस्तः[53] ॥ २१ ॥

धर्मादिको नास्ति च यन्मते सः चार्वाकपक्षस्सुनिरस्त[54] एव ।
देहस्य चाश्मा नयनादिकं तु विष्णुं विना नेति च पूर्वमुक्तम्[55] ॥ २२ ॥

शरीरसङ्गात् पुरुषप्रवृत्तिः स्वशक्त्यभावेन न युक्त[56] एव ।
कार्यं महत्वादिति युक्तिवादी स तार्किको दूरतरं निरस्तः[57] ॥ २३ ॥

पराणुपुञ्जो जगतो निदानमित्येषवादोपि[58] निरस्त एव ।
न शून्यवादश्च कदापि सिद्धयेदसच्च शब्दो हरिमेव[59] वक्ति ॥ २४ ॥
विज्ञानमात्रं क्षणिकं य आह सर्वप्रकारेण[60] बहिष्कृतस्सः ।
सत् स्यादसत् स्यात् सदसच्च न स्यादित्यादि वादी[61] च निरस्त एषः ॥ २५ ॥
पत्युर्मतं सर्वविरुद्धमेतत् उग्रश्च रुद्रः परतन्त्र[62] एव ।
शक्तिश्च काचित् जगति प्रसिद्धा सा देवता विष्णुमृते[63] न शक्ता ॥ २६ ॥
